International Journal of Sanskrit Research 2021; 7(6): 251-254

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(6): 251-254
© 2021 IJSR
www.anantaajournal.com
Received: 12-09-2021
Accepted: 16-10-2021

**अनिमेष-हालदार इत्यनेन**
अतिथि उपन्यासकः, मङ्गलुरु विश्वविद्यालय कालेज्, मङ्गलुरु, कर्नाटक, भारत

**Corresponding Author:**
**अनिमेष-हालदार इत्यनेन**
अतिथि उपन्यासकः, मङ्गलुरु विश्वविद्यालय कालेज्, मङ्गलुरु, कर्नाटक, भारत

# कालिदासोक्तलोकशिक्षणेषु शास्त्रान्तराणां प्रभावः

**अनिमेष-हालदार इत्यनेन**

**प्रस्तावना**

ग्रन्थारम्भे मङ्गलाचरणं भारतीयकवीनां विशिष्टैका रीतिः। इमां च रीतिमनुसृत्य महाकविना कालिदासेनापि स्वग्रन्थस्य प्रारम्भे मङ्गलाचरणं विहितम्। ऋग्वेदस्यादावपि दृश्यते मङ्गलाचरणम् - 'अग्निमीळे पुरोहितम्...'[1] इति। उपनिषदः आदावपि शान्तिसूचकमन्त्राणामुल्लेखोऽस्ति। तथाहि-

'ओं पूर्णमदः पूर्णमिदं, पूर्णात् पूर्णमुदच्यते।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।
ओं शान्तिः शान्तिः शान्तिः।।'[2] इति।

वाल्मीकिरामायणस्य प्रारम्भे मङ्गलाचरणं तावत् –

'तपः स्वाध्यायनिरतं तपस्वी वाग्विदां वरम्।
नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुङ्गवम्।।'[3] इति।

अतः एवं वक्तुं शक्यते यत् पूर्वाचार्याणां विशेषरीतिम् अनुसरन्नेव कालिदासः स्वग्रन्थे मङ्गलम् आचचार।
अभिज्ञानशकुन्तलनाटकस्य प्रथमाङ्के नटी सूत्रधारस्य प्रयोगकौशलं प्रशंसति। तथापि सूत्रधारेण स्वाहंकारो न सूचितः। कस्मिन्नपि विषये अभिज्ञोऽपि स्वाहंकारं न प्रकाशयेत्। अनुरूप एव दृष्टान्तः महाकविकालिदासात् प्राग् अर्थशास्त्रकारेण कौटिल्येन स्वग्रन्थे उल्लिखितः। यथा - 'मनाद् रावणः परदारानप्रयच्छन्, दुर्योधनो राज्यादंशं च। मदाद् डम्बोद्भवो भूतावमानी, हैहयश्चार्जुनः। हर्षाद्वातापिरगस्त्यमत्यासादयन्, वृष्णिसङ्घश्च द्वैपायनमिति।'[4] इति।
नटीसूत्रधारयोः मधुरसङ्गीतेन मुग्धाः सन्तः सामाजिकाः निश्चलाः सञ्जाताः। ते च मनोयोगपूर्वकं सङ्गीतं शृण्वन्ति। कस्मिन्नपि विषये सम्यज्ज्ञानाय मनःसंयोगस्य आवश्यकता कियती अस्तीति नाटकादस्मात् सुचारुतया अवगम्यते। विषयेऽस्मिन् चाणक्येन नीतिशास्त्रे उक्तं -

'सर्वेन्द्रियाणि संयम्य वकवत् पण्डितो जनः।
कालदेशोपपन्नानि सर्वकार्याणि साधयेत्।।'[5] इति।

अभिज्ञानशकुन्तलनाटकस्य प्रथमाङ्के रथवेगस्य तथा अश्वस्य वर्णना यथा कालिदासेन कृता तथैव भासेनापि प्रतिमानाटके अनुरूपं वर्णनं विहितम्। यथा –

'द्रुमा धावन्तीव द्रुतरथगतिक्षीणविषया
नदीवोद्वृत्ताम्बुर्निपतित मही नेमिविवरे।
अरव्यक्तिर्नष्टा स्थितमिव जवाच्चक्रवलयं
रजश्चाश्वोद्धूतः पतति पुरतो नानुपतति।।'[6] इति

---

[1]ऋक्संहितायाः, १/१/१
[2]वृहदारण्यकोपनिषद् ५/१/१
[3]रामायणम् १/१
[4]कौटिल्यम् अर्थशास्त्रम् १/६/२
[5]चाणक्यनीतिशास्त्रम्, ६६
[6]प्रतिमानाटकम् १/

राजचक्रवर्तिगुणोपेतं पुत्रं यथा दुष्यन्तो लभेत तदर्थम् आशीर्वादः प्रदत्तो वैखानसेन राज्ञे। अभिज्ञानशकुन्तलनाटकेतरकाव्येष्वपि दृश्यते राजचक्रवर्तिनो लक्षणम्। यथा रघुवंशे-

'अतिरिक्तः करो यस्य ग्रथिताङ्गुलिको मृदुः।
चापाङ्कुशाङ्कितो यस्य चक्रवर्ती भवेद् ध्रुवम्।।'[7] इति।

महर्षिः कण्वः शकुन्तलायै अतिथिसत्कारस्य भारं समर्प्य सोमतीर्थं जगाम। अतः अतिथिसत्कारो हि महती रीतिः। विषयेऽस्मिन् तैत्तिरीयोपनिषदि शिक्षावल्यां प्राप्यते - 'मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव।' [8] इति।मन्त्रेऽस्मिन् अतिथिं देवं मत्वा ईश्वरस्य प्रतिमूर्तिं वा मत्वा श्रद्धानिवेदनं विहितम्। राजा दुष्यन्तः चतुर्दिशि दृष्टिं निक्षिप्य तपोवनस्वरूपस्य परिचयं प्राप्तवान्। ततश्च किं किं तावत् तपोवनस्य लक्षणस्वरूपं तत् तत् सारथिं राजा उक्तवान्। तपोवनस्य वर्णना प्राप्यते भासरचिते स्वप्नवासवदत्तनाटके –

'विश्रब्धं हरिणाश्चरन्ति अचकिता देशागतप्रत्यया
वृक्षाः पुष्पफलैः समृद्धविटपाः सर्वे दयारक्षिताः।
भूयिष्ठं कपिलानि गोकुलधनान्यक्षेत्रवत्यो दिशो
निःसन्दिग्धमिदं तपोवनमयं धूमो हि बह्वाश्रयः।।'[9] इति।

शकुन्तलायाः असामान्यरूपं वर्णयता राज्ञा शैवालावृतपद्मस्य तथा कलङ्कयुक्तचन्द्रस्य सौन्दर्यं वर्णितम्। सममेव वर्णनं प्राप्यते कुमारसम्भवे –

'न षट्पदश्रेणिभिरेव पङ्कजं
सशैवलासङ्गमपि प्रकाशते।'[10] इति।

शकुन्तलाविषये दुष्यन्तमनसि सन्देहे सति राज्ञा चिन्तितं यत् सज्जनानाम् अन्तःकरणप्रवृत्तिः हि प्रमाणमिति। प्रसङ्गेऽस्मिन् मनुसंहितायामुक्तं –

'वोदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्।
आचारश्चैव साधूनाम् आत्मनः तुष्टिरेव च।।'[11] इति।

राज्ञा आहूतः सन् सेनापतिः मृगयया शारीरिकोपकारं ख्यापितवान्। राज्ञः दुष्यन्तस्य सेनापति आदर्शगुणवान्। मृगया राज्ञः कृते उपकारसाधिका भवति। अतः राज्ञे मृगयार्थमुत्साहः प्रदत्तः सेनापतिना। सेनापतिश्च कीदृशो गुणसम्पन्नो भवेदिति विषये मत्स्यपुराणे उक्तं –

'कुलीनः शीलसम्पन्नः धनुर्वेदविशारदः।
हस्तिशिक्षाश्वशिक्षासु कुशलः श्लक्ष्णभाषणः।।'[12] इति।

नाटकेऽस्मिन् करदानविषये कश्चिदुल्लेखः प्राप्यते। यथा तपस्विनां सकाशात् राजा करं ग्रहीतुं न इच्छतीति। कालिदासात् प्राक् भगवान् मनुः मनुसंहितायां करविषये सविस्तरम् आलोचनं चकार। कुतः राजा करं गृह्णाति कस्मात् कथं गृह्णीयादित्यादिविषये सविस्तरमालोचनं प्राप्यते। तद्यथा –

'पञ्चाशद्भाग आदेयो राज्ञा पशुहिरण्ययोः।
धान्यानामष्टमो भागः षष्ठो द्वादश एव वा।।
आददीताथ षड्भागं द्रुमांसमधुसर्पिषाम्।
गन्धौषधिरसानाञ्च पुष्प-मूल-फलस्य च।।
पत्रशाकतृणानाञ्च वैदलस्य च चर्मणाम्।
मृन्मयानाञ्च भाण्डानां सर्वस्याश्ममयस्य च।।'[13] इति।

निर्जने तपोवने विद्यमानस्य मुनीनामाश्रमस्य च गृहस्थाश्रमश्च द्वयोर्मध्ये कोऽपि भेदो नास्ति। मुनयो यथा स्वाश्रमे तिष्ठन्तः पुन्यमर्जयन्ति तथैव गृहिजनाः संसारमागत्य यथार्थकर्मपालनेन पुण्यमर्जयन्ति। प्रसङ्गेऽस्मिन् मनुसंहितायामुच्यते –

'यथा वायुं समाश्रित्य वर्तन्ते सर्वजन्तवः।
तथा गृहस्थमाश्रित्य वर्तन्ते सर्व आश्रमाः।।'[14] इति।
अपि च -
'यथा नदीनदाः सर्वे सागरे यान्ति संस्थितिम्।
तथैवाश्रमिणः सर्वे गृहस्थे यान्ति संस्थितिम्।।'[15] इति।

शकुन्तलां चिन्तयन् राजा दुष्यन्तः विनिद्रः सन् रात्रिम् अतिवाहयति। कामिनाम् एवमेव दशा वर्ण्यते कामशास्त्रे। कामशास्त्रे वात्स्यायनेन स्वग्रन्थे प्रणयिनां दशदशाः उल्लिखिताः। तथाहि –

'दृङ्मनः सङ्गसंकल्पाः जागरः कृशता रतिः।
ह्रीत्यागोन्मादमूर्च्छन्ता इत्यनङ्गदशा दशः।।'[16] इति।

राज्ञः चिन्तातः अनुमीयते यत् देवी लक्ष्मी यदि कमपि इच्छति तस्य अभ्युदयः निश्चित एव। कुमारसम्भवमहाकाव्येऽपि दृश्यते समैव वर्णना। तथाहि –

'दिवं यदि प्रार्थयसे वृथा श्रमः
पितुः प्रदेशास्तव देवभूमयः।
अथोपयन्तारमलं समाधिना
न रत्नमन्विच्छति मृग्यते हि तत्।।'[17] इति।

राज्ञा दुष्यन्तेन शकुन्तला गान्धर्वविवाहेन परिणीता। गान्धर्वविवाहस्य लक्षणमुक्तं मनुसंहितायाम् –

'इच्छयान्योन्यसंयोगः कन्यायाश्च वरस्य च।
गान्धर्वः स तु विज्ञेयो मैथुन्यः कामसम्भवः।।'[18] इति।

गान्धर्वविवाहो हि शास्त्रसम्मतः इति शकुन्तलां बोधयितुमियेष राजा दुष्यन्तः। भगवतः मनोर्मतानुसारेण अष्टप्रकारविवाहेषु गान्धर्वविवाहः राक्षसविवाहश्च पृथक्तया मिश्रतया वा क्षत्त्रियस्य धर्मसम्मतः। कालिदासात् प्राक् मनुसंहितायाम् अष्टविधविवाहवर्णनाप्रसङ्गे उक्तम् –

'ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथासुरः।
गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधर्मः।।'[19] इति।

कालं निरूपयता कण्वशिष्येण यस्य श्लोकद्वयस्योल्लेखो विहितस्तमिन् मनुष्यस्य भाग्यनिरूपणविषये आलोचना वर्तते। मनुष्यजीवनं न केवलं सुखमयं भवति न च दुःखमयम्। चक्रनेमिक्रमेण कदापि सुखं कदापि दुःखमायाति जीवने। अतः सुखेषु

[7] अभिज्ञानशकुन्तलम्, पृ. ३७
[8] तै.उप. शिक्षावली.
[9] स्वप्नवासवदत्तम् १/१२
[10] कुमारसम्भवम्, ५/९
[11] मनुसंहिता, २/६
[12] अभिज्ञानशकुन्तलम्, पृ. १२९
[13] मनुसंहिता, ७/१३०-१३२
[14] मनुसंहिता, ३/७७
[15] मनुसंहिता, ६/९०
[16] कामशास्त्रम् (वात्सायणीयम्)
[17] कुमारसम्भवम्, ५/४५
[18] मनुसंहिता, ३/३२
[19] मनुसंहिता, ३/२१

दुःखेषु च न विचलितो भवेदिति आशयः। विषयेऽस्मिन् भासेन स्वप्नवासवदत्तनाटके उल्लिखितम् –

'पूर्वं त्वयाप्यभिमतं गतमेवमासी-
च्छलाघ्यं गमिष्यसि पुनर्विजयेन भर्तुः।
कालक्रमेण जगतः परिवर्तमाना
चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः।।'[20] इति।

यश्च दुःखेषु अचञ्चलः सुखेषु च अस्पृहस्तिष्ठति स एव क्रोधजिद् धीरो जनः। तथाहि श्रीमद्भगवद्गीतायामुक्तं भगवता श्रीकृष्णेण-

'दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते।।'[21] इति।

प्रकृतिं प्रति शकुन्तलायाः प्रेम तथा मनुष्येतरप्राणिनः प्रति अपारः स्नेहः विशेषतया उल्लेख्यः। कालिदासपूर्ववर्तिना महाकविना भासेन अभिषेकनाटके प्रकृतिं प्रति प्रेम्णः उल्लेखः कृतः। तथाहि –

'यस्यां न प्रियमण्डनापि महिषी देवस्य मन्दोदरी,
स्नेहात् लुम्पति पल्लवान् न च पुनर्वीजन्ति यस्यां भयात्।
बीजन्तो मलयानिला अपि करैरस्पृष्टबालद्रुमा
सेयं शक्ररिपोरशोकवनिका भग्नेति विज्ञाप्यताम्।।'[22] इति।

महर्षेः कण्वस्याश्रमं परित्यज्य यदा शकुन्तला पतिगृहं याति स्म तदा तस्याः आत्मीयाः, वन्यपशवः, वृक्षाः लताश्च शोकेन अभिभूताः सञ्जाताः। ते च स्वरीत्या आत्मवेदनां सर्वसमक्षं प्रकाशितवन्तः। अनुरूपमेव वर्णनं दृश्यते भासरचिते प्रतिमानाटके। तत्र अयोध्यातः वनगमनकाले अयोध्यावासिनाम् अन्येषां च समैव दशा जाता। तथाहि –

'नागेन्द्रा यवसाभिलाषविमुखाः सास्रेक्षणा बाजिनो
हेषाशून्यमुखाः सवृद्धवनिताबालाश्च पौरा जनाः।
त्यक्ताहारकथाः सुदीनवदनाः क्रन्दन्तः उच्चैर्दिशा
रामो याति यया सदारसहजस्तामेव पश्यन्त्यमी।।'[23] इति।

पतिगृहं गत्वा साध्विस्त्रियः किं कार्यं किञ्चाकार्यमिति महर्षिणा कण्वेन शकुन्तला समादिष्टा। विवाहानन्तरं पतिगृहे किं कार्यमिति विषये मनुसंहितायामुक्तं यत् –

'वैवाहिको विधिः स्त्रीणां संस्कारो वैदिकः स्मृतः।
पतिसेवा गुरौ वासो गृहार्थोऽग्निपरिष्क्रिया।।'[24] इति।

महाकविना कालिदानेन अभिज्ञानशकुन्तलनाटके 'रम्याणि वीक्ष्य..' इत्यादिश्लोके जन्मान्तरवादस्य उल्लेखः कृतः। जीवानां जीवनावसानान्तरं स्थूलशरीरस्य विनाशेऽपि आत्मनः विनाशो न सम्भवति। यतो हि आत्मा अजरो, नित्यः, शाश्वतः, जन्ममृत्युहीनश्च। तथाहि श्रीमद्भगवद्गीतायामुक्तं भगवता श्रीकृष्णेन –

'न जायते म्रियते वा कदाचिन्
नायं भूत्वा भविता वा न भूयः।
अजो नित्यः शाश्वतोऽयं पुराणो
न हन्यते हन्यमाने शरीरे।।'[25] इति।

[20]स्वप्नवासवदत्तम्, १/४
[21]श्रीमद्भगवद्गीता, २/५६
[22]अभिषेकनाटकम्, ३/१
[23]प्रतिमानाटकम्, २/२
[24]मनुसंहिता, २/६७

ये तावत् लोककल्याणरतास्ते सर्वदा कार्यरतास्तिष्ठन्ति। तेषां विश्रामावकाशं नास्ति। प्रजानां सुखेनैव राज्ञः सुखं, प्रजानां हितेषु एव राज्ञः हितम्। अस्मिन् विषये कौटिल्येन अर्थशास्त्रे उक्तं –

'राज्ञो हि व्रतमुत्थानं यज्ञः कार्यानुशासनम्।
दक्षिणा वृत्तिसाम्यं च दीक्षितस्याभिषेचनम्।।
प्रजासुखे सुखं राज्ञः प्रजानां च हिते हितम्।
नात्मप्रियं हितं राज्ञः प्रजानां तु प्रियं हितम्।।
तस्मान्नित्योत्थितो राजा कुर्यादर्थानुशासनम्।
अर्थस्य मूलमुत्थानमनर्थस्य विपर्ययः।।'[26] इति।

राजसभायां कण्वशिष्यद्वयस्य कथमुपस्थितिरिति हेतोः राजधर्मपालने काचिद् हानिर्जाता न वेति स्वापराधः अनुमीयते राज्ञा। रामायणस्य उत्तरकाण्डे समैव वर्णना प्राप्यते। तथाहि –

'राजदोषैर्विपद्यन्ते प्रजा ह्यविधिपालिताः।
असद्वृत्ते हि नृपतौ अकाले म्रियन्ते जनः।।'[27] इति।

सृष्टिकर्त्रा प्रजापतिना ब्रह्मणा उपयुक्तस्वामिना सह यथोपयुक्त वध्वाः मेलनं कारितम्। एतावद्यावत् निन्दितः प्रजापतिः शकुन्तलादुष्यन्तयोः मेलनं सम्पन्नं कृत्वा कलङ्कमुक्तः सञ्जातः। एवमेव दृष्टान्तः परिलक्ष्यते रघुवंशे महाकाव्ये। यथा –

'कुलेन कान्त्या वयसा नवेन गुणैश्च तैस्तैर्विनयप्रधानैः।
त्वमात्मनस्तुल्यममुं वृणीष्व रत्नं समागच्छतु काञ्चनेन।।'[28] इति।

पतिगतप्राणा साध्वी रमणी दीर्घकालं यावत् पितृगृहे तिष्ठति चेत् लोके सा हेयेति प्रतिपन्ना भवेत्। किन्तु, पतिहीना विधवा नारी पितृगृहे स्याच्चेत् लोकापवादहीना भवेत्। तथाहि पद्मपुराणे उच्यते-

'कन्या पितृगृहे नैव सूचिरं वासमर्हति।
लोकापवादः सुमहान् जायते पितृवेश्मनि।।'[29] इति।

जनैः निन्दनीयापि जन्मगता वृत्तिः न परित्यक्तव्या। नीचोऽपि जनः स्ववृत्तिविषये स्वमतपोषणे स्वाधीन आसीत्तदानीन्तने काले। प्रसङ्गेऽस्मिन् श्रीमद्भगवद्गीतायामुक्तं –

'सहजं कर्म कौन्तेय सदोषमपि न त्यजेत्।
सर्वारम्भा हि दोषेण धूमेनाग्निरिवावृताः।।'[30] इति।
'श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात्।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः।।'[31] इति।

प्रमोदवने उपवेशनात् प्राक् कोऽपि शत्रुः हिंस्रपशवो वा न आक्रमेयुस्तस्माद् राज्ञः पार्श्वदाः सम्यग् परीक्षितवन्तः तत्स्थानम्। विषयेऽस्मिन् अर्थशास्त्रे राज्ञः आत्मरक्षाविषये बहुपायाः वर्णिताः। तथाहि - 'मौल-पुरुषाधिष्ठितं यानवाहनमारोहेत् नावं चाप्तनाविकाधिष्ठिताम्। अन्यनौ प्रतिबद्धां वातवेगवशात् च नोपेयात्। उपकान्ते सैन्यमासीत्। मत्स्य-ग्राहविशुद्धमुदकमवगाहेत। बाल्यग्राहपरिशुद्धमुद्यानं गच्छेत्।

[25]श्रीमद्भगवद्गीता, २/२०
[26]कौटिलीयमर्थशास्त्रम्, १/१९/५
[27]रामायणम्, ७/७३
[28]रघुवंशम्, ६/७९
[29]अभिज्ञानशकुन्तलम्, पृ.३७७
[30]श्रीमद्भगवद्गीता, १८/४८
[31]श्रीमद्भगवद्गीता, ३/३५

लुब्धकैः श्वगणिभिरपास्तस्तेन बाल्य-परावाध-भयं चललक्ष्य परिचयार्थं मृगारण्यं गच्छेत्।'[32] इति।

राजा दुष्यन्तो मन्यते यत् यथासमयं बीजवपने यथार्थशस्यानि प्रसूयन्ते बीजानि। तथैव स्ववंशरक्षायै स्वात्मा एव गर्भे प्रविश्य जन्म लभते। तथाहि धर्मशास्त्रप्रणेत्रा मनुना मनुसंहितायामुच्यते –

'पतिर्भार्यां सम्प्रविश्य गर्भो भूत्वेह जायते।
जायायास्तद्धि जायास्त्वं यदस्यां जायते पुनः।।'[33] इति।

प्रजापालनमेव राज्ञः कर्तव्यम्। गृहस्थस्य गार्हस्थ्यधर्मपालनं यथा कर्तव्यं तथैव राज्ञः प्रजापालनम्। तथाहि उच्यते मनुना –

'सर्वतो धर्मषड्भागो राज्ञो भवति रक्षतः।
अधर्मादपि षड्भागो भवत्यस्य ह्यरक्षतः।।'[34] इति।

प्रजापालनविषये रामायणस्य उत्तरकाण्डे उक्तं यत् नियमभङ्गजनितराजरोषात् प्रजाः विपन्नाः जायन्ते। नृपतेश्च असद्गुणहेतोः प्रजानामकालमृत्युर्भवति। तथाहि - 'राजदोषैर्विपद्यन्ते प्रजा ह्यविधिपालिताः...'[35] इति।

पितृपुरुषमुद्दिश्य पिण्डदानाय कोऽपि न स्यादिति विचिन्त्य सुतरां संशयापन्नो जातो राजा दुष्यन्तः। पूर्वपूरुषानुद्दिश्य पिण्डदानविषये महाभारतस्य आदिपर्वणि नीतिशास्त्रे च प्राप्यते –

'इष्टं दत्तं तपस्तप्तं नियमश्च स्वनुष्ठितः।
सर्वमेवानपत्यस्य न पावनमिहोच्यते।।'[36] इति।
अपि च -
'पुत्रप्रयोजना दाराः पुत्रः पिण्डप्रयोजनः।
हितप्रयोजनं मित्रं धनं सर्वप्रयोजनम्।।'[37] इति।

**उपसंहार-** विचित्रेऽस्मिन्नसारसंसारे वास्तविकसमाजस्य चित्राङ्कनेन साधारणानामलक्ष्ये साधारणान् एव लक्ष्यपथमानयति कविः। ईश्वरस्य विविधसृष्टिसु यद्दुर्बोध्यं, प्रहेलिकामयं रहस्यमयञ्च तदायासमनपेक्ष्यैव समेषां समक्षं सारल्येन प्रतिपादयति स कविस्तदीये साहित्ये। अतः विश्वेऽस्मिन् यया कयापि भाषया रचितं साहित्यं हि तदीयसमाजस्य दर्पणभूतम्।

प्राचीन-इउरोपीयसमाजे सुकरात-प्लेटो-अरस्तुप्रमुखानां तथा प्राचीनभारतीयसमाजे वाल्मीकि-व्यास-चाणक्य-भास-कालिदास-माघ-दण्डिप्रमुखानां रचनासु तदानीन्तनसाहित्यसमाजयोः सम्बन्धो दरीदृश्यते। बङ्गीयकविना रवीन्द्रनाथेनापि तस्य 'साहित्येर् तात्पर्य' इति ग्रन्थे उक्तं - साहित्यं खलु बाह्याभ्यन्तरजगतोः सेतुभूतमिति।

न हि कोऽपि कविः समाजं विना काव्यं रचयितुं समर्थः। अतः आ वैदिककालाद् वर्तमानं यावत् सर्वत्रैव कवीनां काव्येषु तत्कालिकसमाजस्य चित्रं प्रतिभासितम्। शब्दार्थभावानां त्रयाणां समन्वयेन काव्यं रचयति कविः। तत्र भाव एव केवलं कवेः स्वकीयः, शब्दश्च वाङ्मयस्य, अर्थस्तु समाजस्य। तत्र भावस्यापि समाजोपजीव्यत्वमवश्यं स्वीकार्यम्।

तत्र मम्मटप्रतिपादितकाव्यप्रयोजनेषु यशसे काव्यम्, अर्थकृते काव्यमिति प्रयोजनद्वयं विहाय सर्वाण्येव प्रयोजनानि समाजस्य कृते एव। विशेषेण वक्तुं शक्यते अन्यानि चत्वारि प्रयोजनानि साकल्येन तावल्लोकशिक्षायै। संस्कृतसाहित्ये दृश्यश्रव्यात्मकयोर्मध्ये दृश्ये लोकवृत्तानामेवानुकरणात् नाटकस्यैव लोकग्राह्यत्वमाधिक्येन ख्यापितम्। नाटके सर्वश्रेण्यान्तर्गतानां मानवानामुपकरणानां विद्यमानत्वात् सार्ववर्णिकः पञ्चमो वेद इति उक्तं नाट्यशास्त्रकारेण भरताचार्येण। अस्मिन् संसारे न हि किमपि ज्ञानं, शिल्पः, कला विद्या वा अस्ति येषामनुकरणं नाटकेषु न स्यादिति। अतो भरताचार्येणोक्तं –

'न तच्छ्रुतं न तच्छिल्पं न सा विद्या न सा कला।
नासौ योगो न तत्कर्म यन्नाट्येऽस्मिन् न दृश्यते।।'[38] इति शम्।

[32] कौटिलीयमर्थशास्त्रम्, १/२१/५
[33] मनुसंहिता, ९/८
[34] मनुसंहिता, ८/३०४
[35] रामायणम्, ७/७३
[36] चाणक्यस्य नीतिशास्त्रे पृ. ४७
[37] चाणक्यनीतिः, ५१
[38] नाट्यशास्त्रम् १/११६

**सहायकग्रन्थनिचयः**


1. अभिज्ञानशकुन्तलम् कालिदासप्रणीतम्, सम्पा. अनिलचन्द्रवसुः, संस्कृत-वुक्-डिपो, कलकाता, २००९.
2. अभिज्ञानशकुन्तलम् कालिदासप्रणीतम्, सम्पा. सत्यनारायणचक्रवर्ती, संस्कृत-पुस्तक-भाण्डार, कलकाता, २००८.
3. अर्थशास्त्रम् कौटिल्यविरचितम्, (प्रथमखण्डः) सम्पा. मानवेन्दु-वन्द्योपाध्यायः, संस्कृत-पुस्तक-भाण्डार, कलकाता, २०१०.
4. अर्थशास्त्रम् कौटिल्यविरचितम्, (द्वितीयखण्डः) सम्पा. मानवेन्दु-वन्द्योपाध्यायः, संस्कृत-पुस्तक-भाण्डार, कलकाता, २०११.
5. अर्थशास्त्रम् कौटिल्यविरचितम्, (प्रथमप्रकरणम्) सम्पा. अनिलचन्द्रवसुः, संस्कृत-पुस्तक-भाण्डार, कलकाता, २०१२.
6. मनुसंहिता मनुविरचिता, सम्पा. मानवेन्दु-वन्द्योपाध्यायः, संस्कृत-पुस्तक-भाण्डार, कलकाता, १४१९ (बङ्गाब्दः).
7. कुमारसम्भवम् कालिदासविरचितम्, प्रकाशिका-विवरणाख्यव्याख्याद्वयोपेतम्, सम्पा. रेवाप्रसाद-द्विवेदी, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, २००४.
8. नाट्यशास्त्रम् भरतप्रणीतम्, सम्पा. सुरेशचन्द्रवन्द्योपाध्यायः, नवपत्रप्रकाशनम्, कलकाता, २०१४.
9. विक्रमोर्वशीयम् कालिदासप्रणीतम्, सम्पा. सीतानाथाचार्यः, संस्कृत-पुस्तक-भाण्डार, कलकाता, १९९९
10. मित्रलाभः नारायणशर्मविरचितः, सम्पा. अशोककुमारवन्द्योपाध्यायः, सदेश, कलकाता, १४२०(बङ्गाब्दः).
11. चाणक्यनीतिशास्त्रम् चाणक्यप्रणीतम्, सम्पा. सत्यनारायणचक्रवर्ती, संस्कृत-पुस्तक-भाण्डार, कलकाता, २०१०.
12. वन्द्योपाध्याय, धीरेन्द्रनाथ, संस्कृतसाहित्येर् इतिहास्, पश्चिमबङ्गराज्यपुस्तकपर्षद्, कलकाता, २०१२.
13. वसु, श्रीचन्द्रनाथ, शकुन्तलातत्त्व, संस्कृत-पुस्तक-भाण्डार, कलकाता, २००५.
14. राणा, विनयकृष्ण, अभिनववितर्के अभिज्ञानशकुन्तलम्, संस्कृत-पुस्तक-भाण्डारः, कलकाता, २००२.
15. चक्रवर्ती, सत्यनारायण, धर्मशास्त्रे आत्महत्या, कालिदास एवं संस्कृतसाहित्य ओ शिक्षाविषयक् अन्यान्य प्रबन्ध, संस्कृत-पुस्तक-भाण्डारः, कलकाता, २००१.
16. Mukhopadhyaya Govindagopala. A New Tri-Lingual Dictionary: Sanskrit-Bengali-English. Sanskrit Book Depot, 28/1 Bidhan sarani, Kolkata-700006, 2013.
17. Kale MR. The Vikramorvasiyam of Kalidasa. Motilal Banarasidass Publishers Private Limited, Delhi, 1967.
18. A History of Sanskrit Literature: A.A. Macdonell. London, 1900.